# लक्ष्मी नृसिंह करावलम्ब स्तॊत्रम्

श्रीमत्पयॊनिधिनिकॆतन चक्रपाणॆ भॊगीन्द्रभॊगमणिराजित पुण्यमूर्तॆ ।
यॊगीश शाश्वत शरण्य भवाब्धिपॊत लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 1 ॥

ब्रह्मॆन्द्ररुद्रमरुदर्ककिरीटकॊटि सङ्घट्टिताङ्घ्रिकमलामलकान्तिकान्त ।
लक्ष्मीलसत्कुचसरॊरुहराजहंस लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 2 ॥

संसारदावदहनाकरभीकरॊरु-ज्वालावलीभिरतिदग्धतनूरुहस्य ।
त्वत्पादपद्मसरसीरुहमागतस्य लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 3 ॥

संसारजालपतितस्य जगन्निवास सर्वॆन्द्रियार्थ बडिशाग्र झषॊपमस्य ।
प्रॊत्कम्पित प्रचुरतालुक मस्तकस्य लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 4 ॥

संसारकूमपतिघॊरमगाधमूलं सम्प्राप्य दुःखशतसर्पसमाकुलस्य ।
दीनस्य दॆव कृपया पदमागतस्य लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 5 ॥

संसारभीकरकरीन्द्रकराभिघात निष्पीड्यमानवपुषः सकलार्तिनाश ।
प्राणप्रयाणभवभीतिसमाकुलस्य लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 6 ॥

संसारसर्पविषदिग्धमहॊग्रतीव्र दंष्ट्राग्रकॊटिपरिदष्टविनष्टमूर्तॆः ।
नागारिवाहन सुधाब्धिनिवास शौरॆ लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 7 ॥

संसारवृक्षबीजमनन्तकर्म-शाखायुतं करणपत्रमनङ्गपुष्पम् ।
आरुह्य दुःखफलितः चकितः दयालॊ लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 8 ॥

संसारसागरविशालकरालकाल नक्रग्रहग्रसितनिग्रहविग्रहस्य ।
व्यग्रस्य रागनिचयॊर्मिनिपीडितस्य लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 9 ॥

संसारसागरनिमज्जनमुह्यमानं दीनं विलॊकय विभॊ करुणानिधॆ माम् ।
प्रह्लादखॆदपरिहारपरावतार लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 10 ॥

संसारघॊरगहनॆ चरतॊ मुरारॆ मारॊग्रभीकरमृगप्रचुरार्दितस्य ।
आर्तस्य मत्सरनिदाघसुदुःखितस्य लक्ष्मीनृसिंह मम दॆहि करावलम्बम् ॥ 11 ॥

बद्ध्वा गलॆ यमभटा बहु तर्जयन्त कर्षन्ति यत्र भवपाशशतैर्युतं माम् ।

ऐकाकिनं परवशं चकितं दयालो लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 12 ॥

लक्ष्मीपते कमलनाभ सुरेश विष्णो यज्ञेश यज्ञ मधुसूदन विश्वरूप ।
ब्रह्मण्य केशव जनार्दन वासुदेव लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 13 ॥

ऐकेन चक्रमपरेण करेण शङ्ख-मन्येन सिन्धुतनयामवलम्ब्य तिष्ठन् ।
वामेतरेण वरदाभयपद्मचिह्नं लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 14 ॥

अन्धस्य मे हृतविवेकमहाधनस्य चोरैर्महाबलिभिरिन्द्रियनामधेयैः ।
मोहान्धकारकुहरे विनिपातितस्य लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 15 ॥

प्रह्लादनारदपराशरपुण्डरीक-व्यासादिभागवतपुङ्गवहृन्निवास ।
भक्तानुरक्तपरिपालनपारिजात लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥ 16 ॥

लक्ष्मीनृसिंहचरणाब्जमधुव्रतेन स्तोत्रं कृतं शुभकरं भुवि शङ्करेण ।
ये तत्पठन्ति मनुजा हरिभक्तियुक्ता-स्ते यान्ति तत्पदसरोजमखण्डरूपम् ॥ 17 ॥

www.yousigma.com